# श्रीविद्यायोगसाधना

प्रो. कमल चन्द्र योगी

ॐ ह्रीं स्वस्ति शिवौ वेदाः , श्रीविद्यायोगसाधना॥
धर्म-संस्कृति-संस्काराः भारतीय-गुणात्मकाः॥1॥

इति विषयमाधृत्य कमलचन्द्रयोगिना॥
विवेकानन्दनाथेन दीक्षान्यनाम धारिणा॥2॥

गुरूं नरहरिं नाथं ध्यात्वाचावेद्यनाथजम्॥
ज्ञानविज्ञानसम्पृक्तं शोध-पत्रं विलिख्यते॥3॥

धर्मार्थकाममोक्षाणामारोग्यमूलमुत्तमम्॥
दुःखत्रयाभिघाताय साङ्ख्यायुर्वेद योगतः॥4॥

क्रियेच्छाज्ञनसंसिद्धौ निरन्तरं सुखान्वयः॥
प्रणवे हि समाविष्टाः ब्रह्माविष्णुमहेश्वराः॥5॥

ह्रीं देवी प्रणवे सन्ति काली-लक्ष्मीस्सरस्वती॥
स्वस्तौवस्ति गणेशश्च, पार्वती-परमेश्वरौ॥6॥

ऋग्यजुस्साम चाथर्व-वेदानां हि चतुष्टयी॥
सर्वसुखाप्ति सिद्ध्यर्थं श्री विद्यायोगसाधना॥7॥

सप्त-सोपान सम्पूर्णा कीर्तिर्वाक् श्रीर्धृतिः क्षमा॥
स्मृतिर्मेधाविभूतीनां प्राप्त्यै श्री-योग-साधना॥8॥

योगे युज्यते सौख्यं धर्मेण धार्यंते प्रजा॥
संस्कृतिविर्श्ववारास्ति शुभ-संस्कार-संस्कृता॥9॥

भारतस्य प्रतिष्ठे द्वे संस्कृतिश्चैव संस्कृतम्।
'अवे-'ति रक्षणे धातोः ॐ रक्षकाक्षरं शुभम्॥10॥

हृ-हरणार्थकादधातो ह्रीं दुःखसंहारकाक्षरम्॥
स्वस्ति गणेशचिह्नास्ति सुष्ठु-शुभं हि वर्तते॥11॥

शिवश्चैवशिवा चेति - पार्वती-परमेश्वरौ॥
चत्वारस्सन्ति वेदाश्च यजुस्सामर्गथर्वणः॥12॥

आयुर्धन्वर्थगन्धर्वाः उपवेदाश्च संस्मृताः॥
त्रिपुरसुन्दरीमाता श्रीविद्येति समीरिता ॥13॥

समाधौ युज धातोश्च योगः समाधि-बोधकः॥
यया हि साध्यते सिद्धिः सा साधना समुच्यते॥14॥

धारणे पोषणे चार्थे धृधातो धर्म-बोधता॥
सम्यग्धि भूषणी भूता विश्ववारा हि संस्कृतिः॥15॥

समपूर्वकात्कृधातोश्च भूषणैक्ये सुडागमे॥
क्तिन् प्रत्यये कृते जाते निष्पद्यते हि संस्कृतिः॥16॥

सम्पूर्वकात्कृधातो भूषणैक्ये सुडागमे॥
घञ्-प्रत्यये कृते जाते संस्कारः प्रतिपाद्यते॥17॥

*रा.सं.संस्थानं (मानित विश्वविद्यालयः )*
*त्रिवेणीनगरम्, जयपुरम् ।*